श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

विल्लूर् नडादूर् श्री श्रीनिधिस्वामि कृतिषु

# ॥ श्रीबालाजिविंशतिः ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीबालाजिविंशतिः ॥

कविताजितकल्लोलिकन्यकाकान्तवक्षसे।
करुणादिगुणाढ्याय कमलानिधये नमः॥

श्रीश्रीनिवास! भवतश्चरणारविन्दे
चित्तं मदीयमधुना विधिना निविष्टन्।
पद्मासनत्वमभजत्तदिहानुरूपं
श्रीभारतीललितविद्रुतदेहमस्तु॥ १॥

वेलातीतदयारसार्द्रमनसे श्रीलालितस्वोरसे
शूलाधारशिवादिकीर्त्यशसे मालाकरप्रेयसे।
नीलाम्भोधरवर्णरम्यवपुषे बालाजि संज्ञाजुषे
कोलालङ्कृतदिव्यदेशजनुषे नीलापुषे ते नमः॥ २॥

दर्वीकरः श्रीरमणः किलायं
पुरामृतं तत्प्रददौ सुरेभ्यः।
दर्वीकराद्रावधुना कलौ च
दत्तेऽमृतं श्लाघ्यतमं नरेभ्यः॥ ३॥

पञ्चायुधे त्वयि निवेशितभावबन्धाः।
पञ्चायुधेन न सुतेन तवाभिभूताः।
पञ्चत्रयेण समवाप्य गुणान् समेतान्।
पञ्चात्मिकां तनुमिमां न पुनर्विशन्ति॥ ४॥

तत्पुत्रसम्मानकृतः पुमांसः
प्रभुं गुरुं वा परितोषयन्ति।
चित्रं त्वयीदं विमुखास्त्वदीये
सुते स्मरे त्वां परितोषयन्ति॥ ५॥

www.prapatti.com

यस्सन्ततं हृदि यदेव जनो विधत्ते
तद्रूपतां समधिगच्छति स क्रमेण।
माता कृता हि जगतां भवता हृदीयं
माता ततोऽसि जगतामभया वयं तत्॥ ६ ॥

विष्णुस्त्यक्ष्यति मेदिनीं कलियुगे हा हेति शास्त्रं जगौ
सत्यं तस्य किलापवादपदवीं शास्त्रं पुनर्गाहते।
एतद्यत्तु कलौ हि वेङ्कटपतिर्भातीति संदृश्यते
का वान्यत्र तथाविधे गतिरियं तद्भक्तसम्भावना॥ ७ ॥

अस्मद्देशिकसार्वभौमकथिता युष्मद्दया या परा
सा सत्यं मयि दुष्कृतैकनिलये भूयो नरीनृत्यति।
नो चेत्क्वाहमहो क्व वा स च भवान् युष्मत्सभा वा सती
क्वेयं यत्र ममेदृशी पुनरियं लीलाक्षरी जृम्भते॥ ८ ॥

मनोभवस्ते सहजः प्रियायाः
मनोभवो मे भवदात्मजातः।
तस्यां यथा त्वां स रतं विधत्ते
तथैष मां त्वन्निरतं विधत्ताम्॥ ९ ॥

यथा भवान् मन्मथतातपादः
तथा मनश्चापि हरे! मदीयम्।
ऐक्यं न पित्रोस्सहते कुमारो
यत्त्वन्नयत्येष मनो जघन्ये॥ १० ॥

दत्तं मनो ननु मयाऽभवदीश्वराय
तत्तत्सुतो हि मदनस्स्ववशं विधत्ते।
स्वल्पेऽपि हन्त निरताय तदर्जनाय
हे शैल! लक्ष्मणवचस्तव रोचतेऽद्य॥ ११ ॥

शेषाहिशैलशिखरे विहृतिं भजन्तं
भाषाधिनाथमुखदैवतपूजिताङ्घ्रिम्।

योषाभिराममभुजमध्यमुदारभावम्
　　एषा जहाति खलु जातु न मे मनीषा॥ १२॥

चक्षुःश्रुतेः गिरिवरे कृतभूरिलीलं
　　चक्षुःश्रुतेश्शिरसि भक्तिमतां च चित्ते।
चक्षुःश्रुते किमपि धाम रमानिवासं
　　चक्षुःश्रुतेश्च युगलं सफलं विधत्ताम्॥ १३॥

परकालकवेस्सहस्रगाथाः
　　भगवद्वेङ्कटनाथगास्समस्ताः।
इति वेङ्कटनाथदेशिकेन्द्रः
　　स जगौ तत्त्वमतीव सूक्ष्मवेदी॥ १४॥

इदमस्य दयाविदां प्रभोः
　　परकालस्य च सूक्तिवेदिनाम्।
अपि नैमिशसूक्तिवेदिनां
　　गिरिमाहात्म्यविदां च वेद धीः॥ १५॥

सद्यः कश्यपपापहारिणि हरौ श्रीस्वामितीर्थाध्वना
　　श्रीसाकेतनिवासिनैजमहितक्रीडाचले भूतले।
वासं भेजुषि मे तमोमुषि दयापीयूषपूर्णात्मनि
　　श्रीमत्याश्रितकल्पके मम मतिः क्रीडां विधत्तां सदा॥ १६॥

नो शान्तो वचसा सदा भगवतः कृष्णस्य भीष्मस्य वा
　　पाण्डोराद्यसुतस्सितासितमनास्तेपे मनस्यन्वहम्।
तद्दृष्ट्वा स पुनश्शशास भगवान् भीष्मस्तमग्रे नतं
　　श्रीमच्छ्रीनिधिदर्शनाय स ततो जातः परं निर्वृतः॥ १७॥

तादृक्षानन्ददायिन्यनघगुणगणे दैवते दैवतानां
　　साम्यान्मर्त्येषु तिर्यक्ष्वपि च बहुविधस्थावरेष्वप्युदीते।
आनन्दाख्ये विमाने वसतिमुपगते श्रीनिवासे निवासे
　　लोकानां सर्वलोकेष्वपि कृतवसतौ यातु वासं मनो मे॥ १८॥



www.prapatti.com

स्वामिपद्मिनीतीरवासिने
    स्वर्णभासुरश्रीविमानिने।
स्वामिने मम श्रीविलासिने
    स्वान्तमर्पितं सर्वदेहिने॥ १९ ॥

कार्तस्वरास्ति जनतेति दयारसार्द्रः
    द्रष्टुं ततश्च परिरक्षितुमेष नाथः।
कार्तस्वराकृतिरुपेत्य विमानभूमिं
    श्रीस्वामितीर्थदिशि दत्तमुखो विभाति॥ २० ॥

सहस्रफणभूधरे सकललोकसेव्ये शुभे
    सहस्रनयनादिभिः सततमञ्जलिस्वीकृतैः।
सहस्रशिरसस्स्थले परिवृते नरैः पण्डितैः
    सहस्रपदमण्डपे भगवतो दया वर्णिता॥ २१ ॥

मानसाधनकृतोपधानया
    मानवानवितुमात्तशय्यया।
मानसान्तरुदिता मुदः पराः
    मानिवास ! तव मूर्तिलीलया॥ २२ ॥

श्रीमद्वेङ्कटशेषागभुवि नित्यरतो हरिः।
श्रीमद्वेङ्कटशेषार्यभुवः स्तुत्या प्रसीदति॥ २३ ॥

॥ इति श्रीबालाजिविंशतिः समाप्ता ॥

www.prapatti.com